३३,७४०
COMPILED
८७०
९५१
CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

33,940

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय

विषय संख्या २८० आगत नं. 33,080

लेखक २५८

शीर्षक संस्कृतोपक्रमपाठः

	सदस्य संख्या	दिनांक	सदस्य संख्या

पुस्तक कार्यालय से प्राप्त होने पर तिथि अंकित करें।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

33,940

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

८७०

आगत संख्या 33,940

८५८

विवरण की तिथि नीचे अंकित है। इस तिथि
वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी
न्यथा ५० पैसे प्रति दिन के हिसाब से विलम्ब
ा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

COMPILED

CHECKED 1973
Initial .....

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऋते ज्ञानान्न मुक्तिः
पुस्तक सं० ८०:८/३०
आगत सं० ४६२
दिनि० ...
गुरुकुल ग्रन्थालय काँगडी.

SANSKRIT PRIMER

BY

P. S. Anantha Narayana Sastry.

1916

गुरुकुल काँगड़ी

PRINTED AND PUBLISHED
BY
THE MANGALODAYAM CO., LTD., TRICHUR.

870,151
33940
CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

संस्कृतोपक्रमपाठः

बालविद्यार्थिनामुपकाराय

पि. एस्. अनन्तनारायणशास्त्रिणा

विरचितः

(*Copy-right to the Author*)

1916

PRINTED AND PUBLISHED BY

THE MANGALODAYAM CO., LTD., TRICHUR.

[Price 3 As.

870,151

33940

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

PREFACE.

This book is intended to supplement Dr. Bhandarkar's first book of Sanskrit now taught in the Lower Secondary classes and to supply a well-arranged series of lessons to beginners of Sanskrit in Sanskrit schools. There are only very few Sanskrit readers intended for beginners; and the few that have come out deplorably lack in arrangement and gradation. They present immense difficulty to the teachers and the taught alike, as the roots of various conjugations and their complicated forms are indiscriminately heaped up in them, within a small space. The use of irregular declensions and long compounds has to be mentioned as another point that makes them even repulsive. My endeavour has been to remove these defects as far as possible and bring out a primer containing simple prose and poetry which would interest and instruct the young. How far I have succeeded in my endeavours I humbly leave to men of erudition and experience to judge.

TRICHUR,
30—7—'16.

P. S. A.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वराः ।

अ आ इ ई उ ऊ ऋ

ॠ ऌ ए ऐ ओ औ

अं इं उं

अः इः उः

व्यञ्जनानि ।

क ख ग घ ङ च छ ज झ

ञ ट ठ ड ढ ण त थ द

ध न प फ ब भ म य र

ल व श ष स ह

कं कः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गजः	जनः	भयं	फलं
गगनं	कमलं	नगरं	पवनः
नयनं	रसनं	जनकः	तनयः
ओदनः	आपणः	उपवनं	नगरजन

क का कि की कु कू कृ कॄ क्लृ के कै को कौ कं कः ।

बालकः	किंकरः	सलिलं
तारकं	शरीरं	धनिकः
आकृतिः	मुसलं	हृदयं
पाठशाला	पचेलिमं	उपदेशः
नामधेयं	उलूखलं	आधोरण

क्य, त्य, द्य, न्य, प्य, म्य, स्य, ष्य,

वाक्यं	धान्यं	कन्या	स्यदः
नृत्यति	उद्यानं	विद्यते	
असत्यं	मनुष्यः	कुप्यति	
तुष्यति	क्षाम्यति	शाम्यति	

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क्र, ग्र, घ्र, त्र, द्र, प्र, म्र, ह्र,

क्रीडा	व्याघ्रः	शीघ्रं
पुत्रः	निद्रा	आम्रं
ह्रियते	प्रभातं	आग्रहः
मद्रपुरं	दूरयात्रा	

र्क, र्ज, र्त, र्थ, र्म, र्व, र्ष, र्ह,

मर्कटः	अनर्थः	गर्जितं
निर्मलं	कर्षणं	पर्वतः
आचार्यः	अवर्तत	मार्जनी
अर्हति	आकर्ण्य	वर्ण्यते

क्ल, ग्ल, प्ल, म्ल, क्व, त्व, द्व,

न्व, श्व, स्व, ह्व,

पक्वं	ग्लानिः	क्लेशः
आप्लुतः	म्लायति	ईश्वरः
स्वभावः	आह्वयति	प्लवंगमः
भरद्वाजः	अह्वा	अन्वमन्यत

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ङ्क, ङ्ग, ञ्च, ञ्ज, ण्ट, ण्ड, न्त, न्द, म्प, म्ब

अङ्कं	वञ्चकः	कन्दुकं
अङ्गना	कुञ्जरः	गोविन्दः
पङ्कजं	तण्डुलः	अम्बरं
कृन्तन्ति	अञ्जसा	वञ्च्यते
कम्पमानः	प्रतिबिम्बं	गङ्गानदी

क्क, च्च, ट्ट, त्त, न्न, प्प,

कुक्कुटः	घट्टनं	उत्तमं
उच्चकैः	अप्पतिः	सञ्चारितं
उन्नतं	खिन्नमनाः	मत्तगज

क्ष, घ्न, च्छ, ज्ञ, त्थ, द्ध, स्थ, ष्ट, ष्ठ.

गच्छति	कुलत्थः	श्रद्धालुः	कृतघ्नः
यावच्छक्यं	स्थूलबुद्धिः	भिक्षुकबालः	
उच्छिष्टान्नं	आज्ञापयति	निष्ठुरवाक्यं	

---

*अस्मिन् पुस्तकेऽनुपयुक्तानि संयुक्ताक्षराणि नात्र योजितानि। उपयुक्तेष्वपि पठनारम्भेऽत्यावश्यकान्येव योजितानि। इतराण्यवसरप्राप्तौ पाठनीयानि॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रथमः पाठः १ ।

(१) रामः पठति । गगनं विलसति ।
गोविन्दः क्रीडति । सूर्यः प्रकाशते ।
कमलं विकसति । तारकाणि न प्रकाशन्ते ।
सलिलं प्रवहति । पर्णानि स्पन्दन्ते ।
फलानि पतन्ति । पवनः शनैः संचरति ।

द्वितीयः पाठः २ ।

सूदः ओदनं पचति । शिष्याः आचार्यं नमन्ति । भिक्षुकाः ग्रामं गच्छन्ति ।
(२) त्वं फलानि भक्षयसि । अहं कन्दुकेन क्री-

(१) तत्र तत्र पाठेषूपयुक्तानां शब्दानां केवलं विभक्तयः पाठ्यन्ताम् ॥
(२) युष्मदस्मदोः प्रथमामातं सम्प्रति पाठयितव्यम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

डामि । जनाः नयनाभ्यां पश्यन्ति । पाद
पाः पादैः सलिलं पिबन्ति । जनकः पुत्रं क
राभ्यां श्लिष्यति । बालः प्रमोदेन नृत्यति
कदा नगरं गच्छसि ? कुत्र वसति रामः
किंकरः कुतः आगच्छति ?

तृतीयः पाठः ३ ।

कृष्णः किंकरेण सह ग्रामं अगच्छत्
रामः सीतया लक्ष्मणेन च सह काननं अग
च्छत् । बालः कन्दुकेन सह तत्र अपतत्
रामः भिक्षुकाय अन्नं अयच्छत् । कुसुमेभ्य
उद्यानं गच्छामि । भिक्षुकाः ओदनाय ग्रामा
अटन्ति । किंकरः तण्डुलाय आपणं अग
च्छत् । रामः किंकराय अकुप्यत्, तं अत
डयत् च । सूतः स्यन्दनात् अपतत् । क
दा सः स्यन्दनात् अपतत् ? अद्य प्रातः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्याघ्रात् भयेन बालकः उच्चैः अक्रोशत् । चोरेभ्यः भयेन जनाः शीघ्रं अधावन् । ह्यः सायं मद्रपुरात् अत्र आगच्छम् ॥

तुरीयः पाठः ४ ।

बालकस्य कन्दुकं कूपे अपतत् । सः जनकस्य निकटे विलपति । कन्दुकस्य मूल्यं एकं रूपकम् । वृक्षस्य शाखायां रम्याणि फलानि लम्बन्ते । पचेलिमानि फलानि मधुराणि संपद्यन्ते । तानि बालकेभ्यः रोचन्ते । आम्रं फलेषु श्रेष्ठं भवति । गोविन्द, त्वं आम्राय स्पृहयसि किम् ? उद्याने वृक्षाः फलानां समूहैः शोभन्ते । पूर्वं कुसुमं जायते पश्चात् फलम् । कतिपयैः दिवसैः फलानि पक्वानि भविष्यन्ति । तदा तानि स्वयं एव पतिष्यन्ति । कदा त्वं उद्यानात् आगमिष्यसि ?

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अहं त्वां गृहे प्रतिपालयिष्यामि । आचार्यः दण्डयिष्यति इति भयेन शिष्याः पाठान् सम्यक् पठन्ति ॥

पञ्चमः पाठः ५ ।

पाठशालायां कति बालकाः सन्ति ? प्रथमायां कक्षायां पञ्च द्वितीयायां पञ्च च पठन्ति । उपाध्यायः शिष्येषु अतीव स्निह्यति । सः धारणं विना तेभ्यः न कुप्यति । एकः बालकः समये पाठशालां न आगच्छत् । तं उपाध्यायः बहिः अस्थापयत् । तदा अपराः बालकाः तस्य वदनं ऐक्षन्त । तदा सः अतीव अलज्जत च । इतः परं समये समागमिष्यामि इति सः उपाध्यायं अवदत् । उपाध्यायः तस्मिन् करुणया तं अन्तः आह्वयत् । बालकाः हस्तयोः पुस्तकानि धारयन्ति । अ-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लसाः बालकाः परीक्षायां विजयं न लभन्ते । गोविन्दस्य श्रद्धया उपाध्यायः अतुष्यत्; तस्मै पारितोषिकं अयच्छत् च । श्रद्धया विना ज्ञानं न वर्धते; ज्ञानात् विना सुखं न जायते च । प्रातः सायं च शिष्याः आचार्यं वन्दन्ते । 'आचार्याय नमः' इति ते वदन्ति; 'शिष्येभ्यः स्वस्ति' इति सः तान् प्रतिवदति च ॥

षष्ठः पाठः ६ ।

नृपः धर्मेण जनान् रक्षतु । जनाः नृपं उपहारैः प्रीणयन्तु । सर्वदा सत्यं वदत; कदापि अनृतं मा वदत । देवस्य कृपया सुखं विन्दामहै । आपणं गच्छ इति रामः किंकरं आदिशत् । दुर्जनैः सह मा संगच्छध्वं इति बालकान् उपाध्यायः आदिशत् । मित्राणां व-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चनानि सदा आद्रियामहै । अधर्मं त्यज धर्मं चर । देशान् अट जनानां स्वभावं बुध्यस्व । सज्जनानां उपदेशान् अनुसरत । ईश्वरः सर्वत्र अस्ति इति चित्ते धारयत । सायंप्रातः तं कुशलाय प्रार्थयध्वम् ॥

सप्तमः पाठः ७ ।

कस्य मन्दिरं (१) एतत् ? रामस्य मन्दिरं एतत् । एतस्मिन् कति जनाः निवसन्ति ? पञ्च पुरुषाः एतस्मिन् निवसन्ति । रामस्य कति पुत्राः सन्ति ? रामस्य त्रयः पुत्राः । किं रामस्य कन्या विद्यते ? विद्यते, रामस्य एका कन्या च अस्ति । तस्याः नामधेयं किम् ? 'रमा' इति रामस्य कन्यायाः नामधेयम् । सा

(१) तच्छब्दस्य विभक्तिरूपाणामादौ 'ए'कारं संयोज्य एतच्छब्दस्य रूपाणि सुखेन बोधयितुं शक्यन्ते ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पाठशालां गच्छति किम् ? सा दिने दिने प्रातः पाठशालां गच्छति । कस्यां कक्ष्यायां सा पठति ? सा तृतीयायां कक्ष्यायां सम्प्रति पठति । रमायाः सोदराः सम्प्रति किं पठन्ति ? ते सम्प्रति प्रथमं पुस्तकं शिक्षन्ते । एतस्य पुस्तकस्य किं मूल्यम् ? एतस्य मूल्यं द्वे कले । कः पुस्तकं एतत् अरचयत् ? उपाध्यायः पुस्तकं एतत् शिष्याणां उपकाराय अरचयत् ॥

अष्टमः पाठः ८ ।

रामः अहं च एतस्मिन् हर्म्ये वसावः । कृष्णः त्वं च सम्प्रति कुत्र वसथः ? । श्वः प्रभाते त्वं अत्र आगच्छ । त्वं अहं च क्रीडायै आरामं सह गच्छावः । ग्रामे निवासः शरीरस्य सुखं जनयति । नगरेषु प्रायेण वातः मलिनः भवति । पादपैः पूर्णे देशे वातः पूतः भ-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वति । पूतः वातः, निर्मलं सलिलं, पथ्यः आहारः च सुखं आवहन्ति । तेषु अपि पूतः वातः मुख्यः भवति । जलं आहारं च विना कतिपयान् क्षणान् नयामः, वातं विना एकं क्षणं अपि न नयामः । कूपेषु जलं नितरां निर्मलम् । तत् एव पानाय जनाः आददन्ते (१) । पक्वानि धान्यानि फलानि च भोज्येषु अतीव पथ्यानि । क्षीरं घृतं च मेधां बलं अपि वर्धयतः । मितः हितः च आहारः आरोग्यस्य कारणं; अमितः अहितः च रोगाणां निमित्तम् ॥

(२) नवमः पाठः ९ ।

रामः श्लोकं पठति । रामेण श्लोकः पठ्यते ॥
आचार्यः शिष्यं ताडयति । आचार्येण शिष्यः ताड्यते ॥

---

(१) दद दाने इति शब्विकरणो धातुः ॥
(२) अयं पाठः कर्मणि भावे च लकारस्य प्रयोगं बोधयितुम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नृपः जनान् रक्षति । नृपेण जनाः रक्ष्यन्ते ।
ईश्वरः लोकं सृजति । ईश्वरेण लोकः सृज्यते ।
जनकः तनयं श्लिष्यति । जनकेन तनयः श्लिष्यते
कृष्णः कमलं पश्यति । कृष्णेन कमलं दृश्यते ।
धनिकः धनं यच्छति । धनिकेन धनं दीयते ।
मेघः जलं वहति । मेघेन जलं उह्यते ।
सिंहः कुञ्जरान् अत्ति । सिंहेन कुञ्जराः अद्यन्ते ।
कमलं विकसति । कमलेन विकस्यते ।
तारकाणि प्रकाशन्ते । तारकैः प्रकाश्यते ।

दशमः पाठः १० ।

ईश्वरः ।

ईश्वरः लोकान् असृजत् । सः मनुष्यान्, मृगान्, खगान्, कीटान् च सृजति स्म । चरं अचरं च सर्वं तेन एव असृज्यत । सः मनुष्येभ्यः पञ्च इन्द्रियाणि अयच्छत् । कानि तानि ? नेत्रं, श्रोत्रं, घ्राणं, रसनं, स्पर्श-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नं च पञ्च इन्द्रियाणि । नेत्रेण रूपं, श्रोत्रेण स्पर्शः, घ्राणेन गन्धः, रसनेन रसः, स्पर्शनेन स्पर्शः च गृह्यन्ते । एतानि पञ्च इन्द्रियाणि ज्ञानं जनयन्ति । अतः तानि ज्ञानेन्द्रियाणि इति कथ्यन्ते । नेत्रेण हीनः अन्धः इति कथ्यते । श्रोत्रेण हीनः बधिरः इति च । पादेन हीनः खञ्जः ॥

ईश्वरः जनान् करुणया संकटेभ्यः रक्षति च । वयं ईश्वरं न पश्यामः तथापि सः सर्वान् सदा पश्यति । यः सर्वेभ्यः जनेभ्यः ज्ञानं यच्छति स्म तं ईश्वरं सर्वदा प्रणमत । तस्य यत् अहितं तत् पापम् । तस्मात् पापं कदापि चित्तेन मा चिन्तयत, जिह्वया मा कथयत, शरीरेण च मा आचरत ॥

एकादशः पाठः ११ ।

अश्वः ।

अश्वो मृगाणां मध्येऽतीव जवनः । स

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नराणां बहुधोपकाराय भवति । अश्वाः शकटं वहन्ति । नरा अश्वानारोहन्ति च । अश्वा यूरोपराज्ये क्षेत्राणां कर्षणाय युगे बध्यन्ते । अश्वो व्याघ्र इव मांसं न भक्षयति; किं तु तृणानि भक्षयति । कुलत्थश्चाश्वानामाहारो भवति । अश्वस्य पादानामन्ते खुरा विद्यन्ते । अश्वस्य खुरो वृषस्य खुर इव न दलितः । तस्य लाङ्गूलं चामरमिव रम्यम् । तस्य ग्रीवाया उपरि शिखा वर्तते । जनास्तां तदा तदा कृन्तन्ति । अश्वो निद्रायै न शेते; किं तु स्थित एव निद्रां भजति । स त्वरया गच्छति । अतस्तस्य 'तुरग' इति संज्ञा समजायत । अश्वानां शाला 'मन्दुरा' इति कथ्यते ॥

द्वादशः पाठः १२ ।

कृतज्ञता ।

कश्चन वृद्धो मार्गस्य पार्श्वे बालानामा-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

म्राणां रोपणमारभत । तदानीं केचन पान्था-
स्तमित्थमपृच्छन् । 'भो त्वमतीव वृद्धोऽसि
अचिरेण त्वं मरिष्यसि च । तत्किमर्थमेतान्
बालानाम्रान् रोपयसि ? एतेषां फलं त्वं न भ-
क्षयिष्यसि । तस्माद्वृथैवैष प्रयत्नः' । वृद्ध-
स्तान् प्रत्यभाषत । 'मैवं वदत । पूर्वे पुरुषा
आम्रानरोपयन् । तेषां फलानि वयं सम्प्रत्यनु-
भवामः । तथैव परेषां जनानामुपकारायाहमा-
म्रान् रोपयामि । अन्यथाहं कृतघ्नः पापश्च भ-
विष्यामि' इति । पान्थास्तस्योत्तरेण नितराम-
लज्जन्त; तूष्णीं चागच्छन् । पूर्वैः कृतमुपकारं
सर्वदा स्मरत ॥

त्रयोदशः पाठः १३ ।

सत्यम् ।

हरिर्नाम बालकः सदा सत्यमेव वदति
स्म । स जनकस्य जनन्याश्च वचनान्यन्वरुध्य-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त । तस्य शीलेन प्रीतः पिता तस्मै छुरिका-
मेकां प्रायच्छत् ॥

एकस्मिन् दिने हरिः क्रीडायै छुरिक-
या सहोद्यानं प्राविशत् । स तया छुरिकया
वृक्षान्, लताः, पल्लवानि, कुसुमानि च कृन्त-
ति स्म । अन्ते हरिणा पितुरतीव प्रियो बा-
लाम्रश्छुरिकयाच्छिद्यत । क्रीडाया अनन्तरं स
गृहमागच्छत् । ततः पाठशालां चागच्छत् ॥

हरेः पिता वृक्षाणां वीक्षणायारामं
प्राविशत् । तत्र स हरिणा छुरिकया छिन्नं बा-
लाम्रमपश्यत् । तेन तस्य हृदयं नितरामदूय-
त । हन्त को वा मूर्ख एवमाचरादिति चिन्त-
या खिन्नः स गृहं न्यवर्तत ॥

स सायं पाठशालाया निवृत्तं हरिमपृ-
च्छत । 'हरे, किमवगच्छसि को बालाम्रमकृ-
न्तदिति' ? । भयेन हरिर्वेपत; हरेर्नेत्राभ्यां बा-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ष्पं च प्रावहत् । परं तु हरिः सत्यमेवावदत् 'पितः, अहमेवाज्ञानाद्बालाभ्रमकृन्तं' इति सोऽकथयत् । हरेः पिता तस्य सत्येन समतुष्यत; तस्मै पारितोषिकं चायच्छत् । बालका सदा सत्यमेव वदन्तु ॥

चतुर्दशः पाठः १४ ।

गजः ।

यथा जले विद्यमानानां जन्तूनां मध्ये तिमिंगिलः सुतरां पृथुस्तथा स्थले विद्यमानेषु जन्तुषु गजः पृथुतमः । तस्य पुरतो लम्बमानः करः 'शुण्डा' इति व्यवह्रियते । शुण्डाया अग्रे द्वे सुषिरे विद्येते । गजस्ताभ्यां जलं पिबति । यतः स द्वाभ्यां पिबति ततः 'द्विप' इति तस्य संज्ञा ॥

धवले दीर्घे पृथुनी द्वेवस्तुनी गजस्य

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वदने दृश्येते । ते तस्य दन्तौ । वशाया दन्तौ न स्तः । दन्तो बहुषु शिल्पेषु जनैरुपयुज्यते ॥

गजस्य कर्णौ विशालौ । स तौ सदा चलयति । तौ व्यजने इव तस्योपकाराय भवतः । यथा गजस्य शरीरं पृथु तथा तस्य बुद्धिरपि महती । गजः कतिपयैर्दिवसैर्मानुषाणां भाषां चेष्टाश्च सम्यगवधारयति ॥

अस्मिन् देशे दृश्यमानो गजो वर्णेन कृष्णो भवति । ऐरावतो नामेन्द्रस्य गजः श्वेत इतीतिहासेषु वर्ण्यते । तस्य चत्वारो दन्ता इति च वर्णयन्ति ॥

गजः शीलेन सुतरां शान्तः । स पातुर्वचनानि यथावदनुसरति । गुरुतमानां दारूणां कर्षणमन्यदपि बहु कार्यं कुर्वाणः स नृणामुपयुक्तो भवति । केरलेषूत्सवे बहवो गजा अलंकृताः श्रेणीरूपेण स्थाप्यन्ते ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पञ्चदशः पाठः १५ ।

अन्धाः गजश्च ।

अन्धाः केचन पुरुषाः कस्मिंश्चिद्दिने रथ्यायां समसिलन् । तदानीं कश्चिदाधोरणस्तया सरण्या वारणमेकं नयमान आसीत् । तस्य शृङ्खलायाः शब्दं श्रुत्वा किमेतदित्यन्धाः कंचन समीपे वर्तमानमपृच्छन् । 'एष गजो गच्छति' इति स प्रत्यवदत् । 'गजस्याकृतिः कीदृशी' इति तैरन्धैः पृच्छ्यमानः स पुरुषस्तमाधोरणं याचित्वा गजं तेषां निकटमनयत् । अन्धेषु प्रथमो गजस्य शुण्डामस्पृशत्, अन्यः कर्णौ करेणामृशत्, अपरः पादं परामृशत्, इतरः पुच्छं स्पृशति स्म । एवं सर्वे ते गजस्याकृतिं बुध्वा तं व्यसृजन् । ततस्ते गजस्याकृतिमधिकृत्य वचनैः कलहमारभन्त । यः शुण्डामस्पृशत् स गजस्याकृतिर्मुसलस्येवेति हठाद-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वदत् । यः कर्णौ स्पृष्ट्वा न्यवर्तत स गजः शूर्प इवेति दृढमकथयत् । पादं परामृश्य गतोऽन्धो गजमुलूखलेन तुल्यममन्यत । येन पुच्छमस्पृश्यत तेन तु गजो मार्जन्या तुल्य इति पक्षोऽवालम्ब्यत । तेषु चैकोऽपि नान्यस्य मतमन्वमन्यत । अतस्ते चिरं कलहं कृत्वावसाने परस्परं भर्त्सयमानाः स्वां स्वां वसतिमगच्छन् । वस्तुनस्तत्त्वमज्ञात्वा मूढा वृथा मिथः कलहं कुर्वाणा विनश्यन्ति ॥

षोडशः पाठः १६ ।

कुटिलता ।

ग्रीष्मे पिपासया खिन्नो जम्बुकः परितश्चरन् ।
केदारे कुत्रचिज्जीर्णं कूपमेकमवैक्षत ॥ १ ॥
स्वल्पमेवाम्बु तत्रासीत्तल्लब्धुं यतते स्म सः ।
अन्ते स कूपे पतितो यथेष्टमपिबज्जलम् ॥ २ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अथ कूपाद्बहिर्गन्तुमशक्तो जम्बुकःस्वयम् ।
कूपस्यान्तर्वसन्नेव दिवसाननयद् बहून् ॥ ३ ॥
तदानीं बालिशश्छागः कूपस्य तटमागतः ।
अपृच्छज्जम्बुकं, 'मित्र, कस्मात्कूपेऽत्र वर्तसे'॥४॥
सोऽवदत्, 'सलिलस्यास्य रसमास्वादयन्नहम् ।
न तृप्यामि, समागच्छ, यदि स्वादितुमिच्छसि' ५
छागोऽपि तस्य तद्वाक्यं सत्यमित्येव विश्वसन् ।
निर्मलं सलिलं पातुं कौतुकात्कूपमाप्लुतः ॥ ६ ॥
तदानीं वञ्चकस्तस्य शीर्षमारोहदञ्जसा ।
उत्प्लुत्य च ततस्तीरमगच्छद्विहसन्नजम् ॥ ७ ॥
अजस्तु बहिरागन्तुमशक्तो निधनं गतः ।
प्रियं वदद्भिः कुटिलैः सरलो वञ्च्यते जनः ॥ ८ ॥

सप्तदशः पाठः १७ ।

दुराशा ।

कस्यचित् पुरुषस्य वशे दिने दिने सौवर्ण-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मण्डं जनयन्ती कापि कुक्कुटी समवर्तत । स च प्रतिदिनं तदण्डं विक्रीय लब्धेन धनेन वृत्तिं निर्वहति स्म । कदाचित्तस्यैवं चिन्ता स्वान्तमविशत् । सम्प्रति प्रतिदिनमेकमेवाण्डं लभ्यते। तेन च वृत्तिः केवलं निरुह्यते । कुक्कुट्याश्च कुक्षौ बहूनि विद्यन्त एवाण्डानि । यदि तानि सर्वाण्येकदा लब्धानि तर्हि मम दारिद्र्यं सद्य एवापगमिष्यति । तत्सर्वाण्यण्डान्येकदा लब्धुं क उपायः ? । एवमालोचयन् स लुब्धः कुक्कुटीं दारयितुं निरणयत् । ततस्तां बलाद्गृहीत्वा छुरिकया क्रोशन्त्या अपि तस्या उदरं निर्दयमदारयत् । हन्त सा प्राणानमुञ्चत् । सोऽपि तस्या उदरं शून्यं विलोक्य स्वस्य दारुणं कृत्यं च विचिन्त्य नितरामदूयत । एवं प्रतिदिनं लभ्यमाना वृत्तिरपि तस्य दुराशया व्यनश्यत् । दुराशा पापानामनर्थानां च हेतुरिति वयमेतस्याः कथाया अवगच्छामः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अष्टादशः पाठः १८ ।

क्षुद्रः किं करिष्यति ?

कश्चन सिंहः पर्यटनेन श्रान्तस्तरोश्छायायां स्वपन्नासीत् । तदा तरोर्निकटे बिले वसन् कोऽपि मूषकस्तस्याङ्गान्यारुह्येतस्ततो धावितुमारभत । तेन स सुखं निद्रातुं न प्रभवति स्म । एवमसकृत् स्वापात् प्रबोधितः स सिंहः क्रुद्धस्तमाखुं हन्तुं पादमुदयच्छत् । आखुस्तु नितरां भीतो वेपमानस्तमेवमयाचत । 'प्रभो क्षम्यतां ममायमपराधः । अधुना मां प्राणैः सह मोक्तुमर्हसि । यदीदानीं मामहत्वा मुञ्चसि तर्हि तव संमुखितमुपकारं करिष्यामी'ति स पुनःपुनरवदत् । तस्य विलपितं निशम्य सिंहस्य यद्यपि करुणा जाता, तथापि किमयं क्षुद्रो मृगाणामधिपतेर्मम किमुपकरिष्यतीति तं विहसन्नेव गन्तुमन्वमन्यत । अथैकस्यां रजन्यां बिलमधिवसन् मूषको गभीरं

× चोः कुः । ८, २, ३० ※ आने मुक् । ७, २, ८२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुस्तकालय
गुरुकुल कांगड़ी

दीनं च गर्जितमाकर्णयत् । तच्छ्रुत्वा बिलान्निष्क्रम्य यावत्पश्यति तावज्जाले पतितं तं सिंहमवालोकत । तत्क्षणमेव मूषको जालस्य पाशान् दन्तैश्छित्त्वा सिंहं बन्धनादमोचयत् । सिंहोऽपि तदाप्रभृति क्षुद्रः कथं महतामुपकरिष्यतीति मतिमत्यजत् । क्षुद्राण्यपि वस्तूनि कदाचन महतामुपकृतये संपद्यन्ते ॥

एकोनविंशः पाठः १९ ।

विवादस्य फलम् ।

बुभुक्षया पर्यटन्तौ बिडालौ द्वौ महानसम् ।
प्रविश्य विजनं तस्मान्मोदकं समविन्दताम् ॥१॥
मोदकं तौ समादाय विनिष्क्रम्य महानसात् ।
द्विधा कर्तुं यदोद्युक्तौ तदैकोऽन्यं वचोऽवदत् ॥२॥
'त्वयैव प्रथमं दृष्टं मोदकं तन्महानसे ।
तस्माद्द्वयस्य, सकलं तन्मे भवितुमर्हति' ॥ ३ ॥
'मया तु प्रथमं लब्धं तन्मदीयं न संशयः' ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यन्योऽवददेवं तौ कलहं कर्तुमुद्यतौ ॥ ४
एवं विवदमानौ तौ कपिमेकमपश्यताम् ।
तं विवादं शमयितुं बिडालाभ्यां स याचितः ॥ ५
'समं विभज्य दास्ये वां विवादो मास्त्वि'ति ब्रुवन्
दष्ट्वा दन्तैर्मोदकं तन्मर्कटः समखण्डयत् ॥ ६
विषमे शकले वीक्ष्य बिडालौ कुपितौ तदा ।
समं कर्तुं महत्खण्डं पुनरप्यदशत्कपिः ॥ ७
अन्यत्खण्डं तदा किंचिन्महत्तरमदृश्यत ।
समीकर्तुं ततः खण्डात्कपिः किंचिदभक्षयत् ॥ ८
मुहुरेवं भक्षयित्वा किंचिन्मात्रमशेषयत् ।
तदा बिडालयोश्चित्ते विवेकः समजायत ॥ ९
'नेतः परं विवादोऽस्ति तदुच्छिष्टं प्रयच्छ नौ'
इति नम्रौ बिडालौ तं प्रार्थयेतां प्लवङ्गमम् ॥ १०
'कलहं वां शमयितुं यः प्रयासो मया कृतः
वेतनं तस्य किं नास्ती' त्युक्त्वा तद्विरराम स: ॥ ११
बिडालावपि तद्दृष्ट्वा खिन्नौ तूष्णीमगच्छताम्
न विवादात्परं किंचिद्विनाशस्येह कारणम् ॥ १२

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विंशः पाठः २० ।

परापेक्षा ।

कश्चिद्भरद्वाजो धान्यक्षेत्रे नीडं निर्माय निवसति स्म । तस्य बहवः शाबका आसन् । यावदेते डयितुं शक्ता नाभवन् तावदेव तस्मिन् क्षेत्रे धान्यानि पचेलिमान्यभवन् । अतो धान्यानि लवितुं यदा क्षेत्रस्य पतिरागच्छति तदा शाबकान् स्थलान्तरं नेतुं भरद्वाजो निरणयत् । स प्रतिदिनमाहारं संपादयितुं बहिर्गच्छन् शाबकानेवमवदत् । 'वत्साः, क्षेत्रस्य पतिरत्रागत्य यद्वदति तदवधानेनाकर्णयत; तत्तथैव मां बोधयत च' इति । एवमादिश्य भरद्वाजो बहिरुदडयत । ततः क्षेत्रस्य पतिः पुत्रेण साकमागत्य क्षेत्रं विलोक्यैवमवदत् । 'वत्स धान्यानि पक्वप्रायाणि । एतेषां लवने साहाय्यं कर्तुमस्माकं मित्राण्याहूयन्ता'मिति । 'तथास्तु'

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति स प्रत्यवदच्च । तस्य वचनमाकर्ण्य शा
ङ्किताः शाबकाः सायं निवृत्तं भरद्वाजमिदम
बोधयन् । स तु, 'वत्साः, मास्तु वो भयमि
दानीं, इतोऽपि यदुच्यते तेन तच्छ्रूयता'मित्यु
क्त्वापरेद्युरपि बहिरगच्छत् । क्षेत्रपतिस्तस्मिन
दिने मित्राण्यदृष्ट्वा तनयमभाषत । 'वत्स
नास्माकं मित्राणि साहाय्यं करिष्यन्ति । आ
स्ताम् । बन्धून् श्वः समाह्वय' इति । तान्नि-
शम्य शाबका भयमविन्दन्त । भरद्वाजस्तु
तद्वचनं निशम्य 'नेदानीमपि भयस्यावकाशः
इत्यकथयत् । तृतीयस्मिन् दिने क्षेत्रपतिर्बन्धू
नामदर्शनेन खिन्नः पुत्रमवदत् । 'वत्स, श्व
आवामेव धान्यानि लवितुं यतावहै' इति
तद्वाक्यं शाबकैरुक्तं निशम्य भरद्वाजः 'सम्प्रति
स्थलान्तरं गन्तुं समयः' इति वदन् शाबका
न्यत्र नयति स्म । अन्येषां साहाय्यमेव विश्वस्य
वर्तमानानां कार्याणि न सिध्यन्ति । बालकाः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यावच्छक्यं स्वयमेव कार्याणि साधयितुं प्रयतध्वम् ॥

एकविंशः पाठः २१ ।

दुश्शकुनम् ।

कोऽपि भूपतिः प्रातरुत्थाय वातायने शीर्षं प्रवेश्य वीथीमवालोकत । तदानीं तत्र पतितान् धान्यकणानुञ्छन्तं भिक्षुकबालमेकमपश्यत् । सोऽपि भुवो भर्तारमैक्षत । यावन्नृपः शीर्षं वातायनस्य द्वारादन्तराकर्षति स्म तावद्वातायनस्य दारुणि घट्टनेन तदुत्पाटितं; ततः सुबहु रुधिरं च प्रावहत् । भूपतिस्तमनर्थं तस्य भिक्षुकबालस्य प्रातर्दर्शनेन जातममन्यत । तस्मै भृशं कुपितः किंकरानाहूय तं बालं बलादानेतुमाज्ञामादिशच्च । किंकरास्तं बालमाकृष्य नृपस्य सविधमनयन् । राजा तमेवमकथयत् । 'रे नीच, अद्य प्रातः तव दर्शनेन मम कपालं भग्नम् । इतः परं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न कस्यापीदृशोऽनर्थः संभवतु । तत्त्वां सद्य एव शीर्षं छित्त्वा हनिष्यामि' । एवमुक्त्वा यावत्स राजा बालकस्य मूर्धानं छेत्तुं कृपाणमुदयच्छत् तावत्स दीनो बालः कम्पमानः सविनयमेवं न्यवेदयत । 'देव, भाग्यहीनस्य मे दर्शनेन देवस्य कपालं भग्नमितीदं सत्यमेव । महाभागस्य देवस्य तु दर्शनेन मम शीर्षच्छेद आसन्नः । तत् कस्य दर्शनं महत्तरस्यानर्थस्य कारणमिति देवः करुणया विमृशतु' इति । तन्निशम्य राजा नितान्तं लज्जितः कृपाणं कोशे निक्षिप्य तं च धीरं बालकं पारितोषिकेण संतोष्य स्वैरं गन्तुमन्वमन्यत ॥

जनः पश्यन्नन्यदोषमात्मदोषान्न पश्यति ।

द्वाविंशः पाठः २२ ।

धैर्यम् ।

उत्तानपादस्य नाम राज्ञः सुनीतिः सुरुचि-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

रिति द्वे भार्ये आस्ताम् । तयोः प्रथमा ध्रुवं नाम तनयमजनयत् । सुरुचिश्चोत्तमं नाम पुत्रमलभत । राज्ञस्तु सुरुच्यामधिकं प्रेमाभवत् । स तामपश्यन् क्षणमात्रमतिवाहयितुं न प्राभवत् । सापि भर्तुरसाधारणेन प्रेम्णा नितरामदृप्यत् ॥

एकदा स राजा सुरुचेः सुतमङ्कमारोप्य लालयन्नवर्तत । तद्दृष्ट्वा सुनीतेस्तनयः कौतुकेन पितुरङ्कमारोढुमागतवान् । तथाभूतं तमवलोक्य सुरुचिः परुषैर्वचनैरभर्त्सयत । 'रे बालिश, धिक्त्वाविनीतस्य चेष्टितम् । त्वं किल दुर्भगायाः सुनीतेरुदराज्जन्म लब्धवानसि । तन्नार्हस्युत्तम इव पितुरङ्कमध्यासितुम् । यदि पुनरुत्तम इव भवितुमभिलषसि तर्हि तपोभिर्भगवन्तमाराध्य मत्तो जनिं लभस्व' इति सा तमभाषत । राजा तु सुरुचिप्रेम्णा परवशस्तूष्णीमतिष्ठत् ॥

तद्वाक्यमाकर्ण्य पञ्चमं वयः स्पृशन्नपि स

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बालको दण्डेन हतः सर्प इव रोषेण श्वसन् मातुः सकाशं गतवान् । मातापि तद्वृत्तान्तं परिजनादवगत्य स्वानि भाग्यानि निन्दन्ती मुहुरश्रूणि मुक्तवती । 'वत्स, सत्यमेव मे सपत्न्या गदितं, यदि त्वमुन्नतं पदमभिलषसि तर्हि लक्ष्म्याः पतिमाराधय' इति चोक्तवती ॥

धीरो ध्रुवस्तदानीमेव सर्वं विहाय तपश्चरितुं घोरं वनं प्रस्थितवान् । मध्येमार्गमागतवतो नारदस्य वचांस्यनुसृत्य वने निराहारस्तपश्चरन् षड्भिर्मासैर्हरिं प्रसाद्य भुवि सार्वभौमतां दिवि च शाश्वतं पदमविन्दत ॥

नलचरितम् ।

प्रणतानामिष्टदात्रीं प्रणिपत्य सरस्वतीम् ।
नलस्य चरितं वक्ष्ये पावनं कलिनाशनम् ॥ १ ॥
निषधानामधिपतिर्नीतिमानश्वकोविदः ।
वीरसेनसुतो वीरो नलो नाम नृपोऽभवत् ॥ २ ॥

GCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

धार्मिके शीलसंपन्ने तस्मिन्नुर्वीं प्रशासति ।
प्रहृष्टमनसः सर्वे जनाः कुशलिनोऽभवन् ॥ ३ ॥
विदर्भाणामधिपतिर्भीमो दमनसेवया ।
सुतां गुणवतीं लेभे रमामिव महीं गताम् ॥ ४ ॥
तस्या गुणान् समाकर्ण्य नलस्तस्यामरज्यत ।
नलस्यापि गुणैर्भैम्याः समकृष्यत मानसम् ॥ ५ ॥
कदाचन विनोदाय क्रीडोद्याने चरन्नलः ।
सरसि क्रीडतो हंसान् हेमवर्णानवैक्षत ॥ ६ ॥
कौतूहलेन तेष्वेकं पाणिना स गृहीतवान् ।
हंसो भीतमनाः क्रोशन्नलमेवमभाषत ॥ ७ ॥
'कृपणं दयनीयं मां कृपालो, मोक्तुमर्हसि ।
जरठा जननी, बालान्यपत्यानि च मे प्रभो ॥ ८ ॥
यथा च दमयन्ती त्वां वल्लभं वरयिष्यति ।
तथा विधास्ये वचनैस्तस्याश्चेतोऽनुरञ्जयन्' ॥ ९ ॥
निषधेन्द्रो निशम्येदं दयया तममुञ्चत* ।
स कुण्डिनं समुड्डीय भैमीसविधमाविशत् ॥ १० ॥
ललिताः तां सखीमध्यादाकृष्यान्यत्र नीतवान् ।
गुणानाख्याय तद्रागं नैषधे समदीपयत् ॥ ११ ॥
'नलं यदि न विन्देयं विशेयमनलं तदा' ।
इति सापि प्रतिज्ञाय नलाप्त्यै तमयाचत ॥ १२ ॥

---

* मुञ्चतिरुभयपदी ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भैम्या वचांसि विज्ञाप्य स राजानमतोषयत् ।
भैमीपर्युत्सुकः कालमनयत्स कथंचन ॥ १३ ॥
विवाहार्हं वयः प्राप्तां सुतां वीक्ष्य विदर्भराट् ।
स्वयंवरं विनिश्चित्य राजवृन्दं समानयत् ॥ १४ ॥
नैषधो रथमारुह्य मुदितः कुण्डिनं व्रजन् ।
मार्गे शक्रं यमं वह्निं वरुणं च समैक्षत ॥ १५ ॥
अवतीर्य रथात्तूर्णं प्रणिपत्य दिशां पतीन् ।
'धन्योऽस्मि किं वः कर्तव्य'मिति पप्रच्छ सादरम् ॥ १६ ॥
'भद्रं ते, भीमराजस्य तनयां कामयामहे ।
वचनं यदि ते सत्यं, दूत्यं नः कर्तुमर्हसि' ॥ १७ ॥
इति वज्रोपमां वाणीमाकर्ण्य बलविद्विषः ।
भैमीरक्तः सत्यवादी नैषधस्तानभाषत ॥ १८ ॥
भैमीमभिलषन् यामि दूत्यं स करवै कथम् ।
कथं पश्यानि तां गुप्तां रक्षिभी राजमन्दिरे ॥ १९ ॥
इत्यावेदितखेदं तं निर्बन्धुः पुनर्बुधाः ।
'अस्मद्वराद्रक्षिणस्त्वां न द्रक्ष्यन्ती'ति चावदन् ॥ २० ॥
स्वीकृत्य दूत्यं धर्मात्मा दूरीकृत्य स्ववाञ्छितम् ।
भूयः स्यन्दनमारुह्य धीरः कुण्डिनमाविशत् ॥ २१ ॥
भैमीं दृष्ट्वा दिगीशानामभिलाषं न्यवेदयत् ।
'वरयस्व महाभागे तेष्वेक'मिति चाब्रवीत् ॥ २२ ॥
'न कामये नलादन्यमेष मे निश्चयो दृढः' ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्युक्तः स तया देवानुपगम्य तथावदत् ॥ २३ ॥
दिगीशाश्च नलाकाराः स्वयंवरमुपागमन् ।
ततो रङ्गं कोमलाङ्गी प्रविवेश दमस्वसा ॥ २४ ॥
दृष्ट्वा पञ्च नलाकारान् मुग्धा तत्रास तत्र सा ।
प्रार्थयामास चेन्द्रादी'न्नलो मे दृश्यता'मिति ॥ २५ ॥
चतुरो विबुधान् स्तब्धलोचनानवबुध्य सा ।
नैषधस्य गले मालां वेपमानकरार्पयत् ॥ २६ ॥
विबुधास्ते वरानष्टौ नैषधाय ददुर्मुदा ।
परिणीय नलो भैमीं प्रहृष्टः पुरमाविशत् ॥ २७ ॥
निवर्तमानाः शक्राद्याः कुण्डिनात्त्रिदिवं प्रति ।
स्वयंवराय गच्छन्तौ ददृशुर्द्वापरं कलिम् ॥ २८ ॥
'पश्यतामेव देवानां भैमी वव्रे नलं नरम् ।
इत्याकर्ण्य सुरेभ्यस्तौ नलाय कुपितौ भृशम् ॥ २९ ॥
अथाब्रवीत्कलिर्मित्रं 'नैषधे निवसन्नहम् ।
भ्रंशयिष्यामि तं राज्यात्साहाय्यं मे समाचर' ॥ ३० ॥
ततोऽवसरमालोक्य कलिराविश्य नैषधम् ।
द्यूताय तं समाह्वातुं प्रेरयामास पुष्करम् ॥ ३१ ॥
'भ्रातर्देवितुमागच्छे'त्याहूतस्तेन नैषधः ।
मानभङ्गममर्षित्वा देवनाय मतिं दधे ॥ ३२ ॥
आविष्टः कलिना दिव्यन्नक्षैर्द्वापरसंश्रितैः ।
द्यूतप्रवीणोऽपि नलः पुष्करेण पराजितः ॥ ३३ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुनः पुनस्तं दीव्यन्तं निवारयितुमक्षमा ।
अपत्ययुगलं भैमी प्रेषयामास कुण्डिनम् ॥ ३४ ॥
देवने हृतसर्वस्वः पुष्करेण नलस्तदा ।
भैम्यैकवाससा साकमेकवासा वनं ययौ ॥ ३५ ॥
क्षुधार्दितः क्षितीन्द्रोऽथ गगने चरतः खगान् ।
ग्रहीतुं प्राक्षिपद्वासः खगास्तदपि जह्रिरे ॥ ३६ ॥
हृते वाससि दुखार्तः प्रेयसीमब्रवीन्नलः ।
विदर्भान् यात्ययं मार्गः किं नु त्वं मन्यसे प्रिये ॥ ३७ ॥
हृतराज्यं क्षुधा श्रान्तं दुःखितं विजने वने ।
कथं विसृज्य गच्छेयं, किमेवं भाषते भवान्' ॥ ३८ ॥
इत्यालपन्तीं वैदर्भीमाश्वास्य निषधाधिपः ।
तद्वस्त्रार्धेन संवीतः सभां कामप्युपेयिवान् ॥ ३९ ॥
पीडितौ क्षुत्पिपासाभ्यां श्रान्तौ पर्यटनेन तौ ।
तत्र निद्रामभजतां शयानौ धरणीतले ॥ ४० ॥
दमयन्त्यां प्रसुप्तायां प्रबुद्धो निषधाधिपः ।
वाससोऽर्धं शनैश्छित्त्वा तां विहाय ततो ययौ ॥ ४१ ॥
'किमिदं कठिनं कर्म करोमी'ति विचिन्त्य सः ।
मुहुर्निवृत्तः पद्माक्षीं वीक्षमाणो रुरोद ह ॥ ४२ ॥
त्रातुमेनामशक्तोऽस्मि त्यजेयं यदि, कुत्रचित् ।
सुचारित्रा सुखं विन्देदिति संत्यज्य तां ययौ ॥ ४३ ॥
प्रबुद्धा दमयन्ती तमदृष्ट्वा विजने वने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हा हेति रुदती, सर्वान् पृच्छन्ती तममार्गयत् ॥ ४४ ॥
इतस्ततो धावमानां विह्वलां वामलोचनाम् ।
जग्राहाजगरः पादे चक्रन्द कुररीव सा ॥ ४५ ॥
तस्याः क्रन्दितमाकर्ण्य कृपया कोऽपि लुब्धकः ।
विदार्याजगरं वक्त्रे मोचयामास सुन्दरीम् ॥ ४६ ॥
अनार्यं कर्तुमिच्छन्तमुपकारिणमप्यमुम् ।
शापाग्नौ शलभं चक्रे वैदर्भी पतिदेवता ॥ ४७ ॥
विह्वला विलपन्ती सा वणिजां सार्थमाश्रिता ।
प्राप्य चेदिपुरीं राजमातरं शरणं गता ॥ ४८ ॥
स्वसुतामिव तां मत्वा राज्ञी मधुरया गिरा ।
आश्वास्यैनां व्रतवतीं वासयामास मन्दिरे ॥ ४९ ॥
नलोऽपि भैमीमुत्सृज्य संचरन् विपिनान्तरे ।
ददर्श दावं तन्मध्या'त्त्रायस्वे'त्यशृणोद्गिरम् ॥ ५० ॥
'मास्तु ते भय'मित्युक्त्वा मध्यमग्नेः प्रविश्य च ।
क्रन्दन्तं मोचयामास दावात्कार्कोटकं नलः ॥ ५१ ॥
'पदानि गणये'त्युक्त्वा स दष्ट्वा दशमे पदे ।
नैषधं विकृतं नृणामवेद्यं कृतवानहिः ॥ ५२ ॥
'इदं वासो वसानस्त्वं निजं रूपमवाप्स्यसि' ।
इति वासो वितीर्यास्मै नागराजस्तिरोदधे ॥ ५३ ॥
अथायोध्यापतिं प्राप्य सूतवेषः स नैषधः ।
वहन् बाहुक इत्याख्यां निनाय दिवसान् बहून् ॥ ५४ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

राज्यभ्रंशं समाकर्ण्य भीमः प्रहितवान् द्विजान् ।
नलं मार्गयितुं, तेषामेकश्चेदिपुरीं ययौ ॥ ५५ ॥
विवर्णां तत्र वैदर्भीं म्लानामिव मृणालिनीम् ।
दृष्ट्वा कथंचिद्बुबुधे सुदेवः स द्विजोत्तमः ॥ ५६ ॥
भ्रातुरिष्टं द्विजं दृष्ट्वा मुक्तकण्ठं रुरोद सा ।
आपृच्छत ततो राज्ञीं कुण्डिनं गन्तुमुत्सुका ॥ ५७ ॥
स्वसुः पुत्रीं विदित्वैनां राज्ञी सा मुमुदेतमाम् ।
स्यन्दनोत्तममारोप्य कुण्डिनं प्रापयच्च ताम् ॥ ५८ ॥
पित्रोः प्रणम्य पदयोराश्लिष्याङ्गानि वत्सयोः ।
जीविताशामङ्कुरितां भीमराजसुता दधे ॥ ५९ ॥
पतिविश्लेषदुःखेन तुद्यमानाथ मर्मसु ।
विहाय लज्जां वैदर्भी जननीं विजनेऽब्रवीत् ॥ ६० ॥
'यदि मामम्ब, जीवन्तीं द्रष्टुं त्वमभिलष्यसि ।
निषधेन्द्रं समानेतुं प्रयतस्वाविलम्बितम्' ॥ ६१ ॥
अरुन्तुदं तद्वचनं विज्ञाय दुहितुर्द्रुतम् ।
नलं मार्गयितुं विप्रानादिदेश विदर्भराट् ॥ ६२ ॥
प्रतिष्ठमानान् वैदर्भी ब्राह्मणानेवमब्रवीत् ।
जनसंसत्सु युष्माभिरिदं वाक्यमुदीर्यताम् ॥ ६३ ॥
'अनुरक्तां प्रियां भार्यां सुप्तां त्यक्त्वा महावने ।
वाससोऽर्धं शनैश्छित्त्वा कितव, क्व गतो भवान्' ॥ ६४ ॥
यदि कश्चित्प्रतिवदेत्तस्य वार्तावगम्यताम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्युक्ता भीमनन्दिन्या ब्राह्मणाः प्रययुर्दिशः ॥ ६५ ॥
अयोध्यानगरीं प्राप्य प्रत्यायातो महीसुरः ।
पर्णादो बाहुकस्येदं वाक्यं भैमीमवेदयत् ॥ ६६ ॥
'चारित्रकवचा नार्यः संकटेषु महत्स्वपि ।
रक्षन्ति स्वयमात्मानं न म्लायन्ति कदाचन' ॥ ६७ ॥
बाहुकेनेति गदितं वचो विज्ञाय भामिनी ।
पर्णादवचनैरेनं नैषधं समभावयत् ॥ ६८ ॥
उपायज्ञा ततो भैमी सुदेवं द्विजमब्रवीत् ।
अयोध्याधिपतिं प्राप्य त्वमेवं वक्तुमर्हसि ॥ ६९ ॥
'वल्लभेन वने त्यक्ता वैदर्भी चिरदुःखिता ।
स्वयंवरोत्सवे कान्तमन्यं श्वो वरयिष्यति' ॥ ७० ॥
अयोध्यां प्राप्य भूदेवः सुदेवो बहुभिर्दिनैः ।
तथैव तस्या वचनमृतुपर्णमबोधयत् ॥ ७१ ॥
तच्छ्रुत्वोत्कण्ठितो गन्तुं मार्गदैर्घ्येण कुण्ठितः ।
स राजा कथयामास बाहुकाय मनोरथम् ॥ ७२ ॥
'तथास्त्वि'ति समाभाष्य बाहुको हयकोविदः ।
स्यन्दने योजयामास तुरङ्गान् जितमारुतान् ॥ ७३ ॥
आरोहतां स्यन्दनं तौ बाहुकस्य तु मानसम् ।
संदेहदोलामारोहद्भैम्यास्तस्मिन् समुद्यमे ॥ ७४ ॥
भैमी किमेवं मन्येत द्विजः किं न्वनृतं वदेत् ।
किं मां द्रष्टुमुपायोऽयमिति चिन्तास्तमाविशन् ॥ ७५ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बाहुकश्चिन्तया म्लानः सूनकर्म समाचरत् ।
ऋतुपर्णस्तु मुमुदे समीक्ष्य स्यन्दनस्यदम् ॥ ७६ ॥
मार्गे पातितमानेतुं पटं राजा तमादिशत् ।
'योजनं समतिक्रान्तं, न शक्य'मिति सोऽब्रवीत् ॥७७॥
बाहुकादश्वहृदयं जगृहे विस्मितो नृपः ।
दिदेश चाक्षहृदयं तस्मै मुदितमानसः ॥ ७८ ॥
लब्धेऽक्षहृदये सोऽपि कलिनात्यज्यत द्रुतम् ।
बोषेण पूरयन्नाशाः स्यन्दनः प्राप कुण्डिनम् ॥ ७९ ॥
परीक्ष्य बाहुकं चिह्नैर्निश्चित्य प्राणवल्लभम् ।
पुनर्जातमिवात्मानं मेने सा भीमनन्दिनी ॥ ८० ॥
वासो धृत्वाहिना दत्तं भैमीसावेधमाविशन् ।
न ददर्श नलः किंचिदश्रुमालाकुलेक्षणः ॥ ८१ ॥
बाहुकं नैषधं बुध्वा प्रहृष्टोऽन्तर्विलज्जितः ।
स्वीकृत्य सत्क्रियां भीमादृतुपर्णः पुरीं ययौ ॥ ८२ ॥
कलिना कुटिलेनैवं क्लेशितः पृथिवीपतिः ।
विदतामिति बन्धूनां व्यलीकं नाभवन्नले ॥ ८३ ॥
तनूभवाभ्यां प्रियया च साक-
मामन्त्र्य बन्धून्निषधानुपेतः ।
द्यूते विजित्यानुजमात्तराज्यः
पुरेव भूयः स महीं शशास ॥ ८४ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

GLOSSARY.

अक्ष *m.* = a die to play with
अजगर *m.* = a boa, constrictor
अञ्जसा *ind.* at once
अपत्य *n.* = issue, progeny
अरुन्तुद *adj*=heart-rending
अलस *adj.* = idle
अहि *m.* = a serpent
आखु *m.* = a mouse
आख्या *f.* = name
आधोरण *m.* = The keeper of an elephant
आराम *m.* = a garden
आशा *f.* = direction, hope
ईर् with उद् *10th con.* to repeat
उपाध्याय *m.* = a teacher
उलूखल *n.* = a mortar
कक्ष्या *f.* = a class
कतिपय *adj.* = a few
कन्दुक *n.* = a ball
कपाल *n.* = skull
कला = anna
कवच = armour
कितव *m.* = a rogue
कीट *m.* = an insect
कुक्कुटी *f.* = a hen
कुञ्जर *m.* = an elephant
कुररी *f.* = a female osprey
कुलत्थ *m.* = gram
कृन्त् *6th con.* = to cut, to trim
कृपण *adj.* = poor, helpless
केदार *m.* = a field
कोविद *adj.* = expert
कोश *m.* = a sheath
क्रन्द् *1st con.* = to cry
क्रुश् *1st con* = to cry, to weep
क्षितीन्द्र *m.* = a king
क्षुध् *f.* = hunger
खुर *m.* = hoof
गगन *n.* = the sky
गद् *1st con.* = to tell
गल *m* = neck
गिर् *f.* = speech
गृ *6th con.* = to swallow

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चारित्र *n.* = chastity, character
छुरिका *f.* = a knife
जवन *adj.* = swift
तूर्णम् *ind.* = soon
त्रस् *1st con.* = to fear
त्रिदिव *m.* = heaven
त्रै *1st con.* = to save
दलित = broken, cloven
दंश् *1st con.* = to bite
दाव *m.* = wild fire
दिव् *4th con.* = to play with dice
दू *4th con.* = to be afflicted
दृप् *4th con.* = to feel proud
दोला *f.* = a swing
धरणी *f.* = the earth
धवल *adj.* = white
धा *3rd con.* with नि = to do, with तिरस् = to disappear
नन्दिनी = a daughter
निकट = near
निधन *n.* = death
नीड *n.* = a nest
पचेलिम *adj.* = ripe
पट *m.* = a cloth
परित: *ind.* = around, about
पावन *adj* = sacred, holy
पिपासा *f.* = thirst
पृथु *adj.* = big, large
प्रवीण *adj.* = proficient
प्लवङ्गम *m.* = a monkey
बालिश *m.* = a fool
बिल *n.* = a hole
बृन्द *n.* = collection, assembly
भरद्वाज *m.* = a lark
भर्त्स् *10th con.* = to scold
भृशम् *ind* = much
भ्रंश् *1st con.* = to fall
मन्दिर *n.* = house, residence
महानस *n.* = kitchen
मार्जनी *f.* = a broom
मिथ: *ind.* = mutually
मुसल *n.* = a pestle
मुहु: *ind.* = again & again
मृणालिनी *f.* = lotus-plant
मेधा *f.* = intellect
म्लै *1st con.* = to fade
यम् (यच्छ) with उद् = to take up, to lift
युग *m.* = a yoke
युगल *n.* = a pair, couple

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यावच्छक्यम् *ind.* = as far as possible

रञ्ज् *4th con.* = to feel affection

रोपण *n.* = planting

लष् *1st or 4th con.* with अभि = to desire

लस् *1st con.* with वि = to look clear

लुब्धक *m.* = hunter

लू *9th con.*=to cut, to reap

वक्त्र *n.* = mouth

वणिज् *m.* = a merchant

वर् *10th con.* = to choose

वशा *f.*= a female elephant

वारण *m* = an elephant

विजन *adj.* = lonely

विद् *2nd con.* = to know

विपिन *n.* = forest

विप्र *m.* = a brahmin

विबुध *m.* = a god

विह्वल *adj.* = distressed

वेतन *n*=pay, remuneration

व्यजन *n.* = a fan

व्यलीक *n.* = displeasure

शम् *10th con.* with नि = to hear

शलभ *m.* = a moth

शावक *m.* = a young one

शिल्प *n.* = craft

शूर्प *m.*=a winnowing basket

शृङ्खला *f.* = a chain

श्रेणी *f.* = a row

सरणि *f.* - a way

सरल *adj.* = straight-forward

सविध *n.* = presence, vicinity

संसत् *f.* = assembly

सम्प्रति *ind.* = now

साकम् *ind.* = with

सुर *m.* = a god

सूत *m.* = a charioteer

स्तब्ध *adj.* = still, motionless

स्यद *m.* = speed

स्यन्दन *m.* = a chariot

स्वप् *2nd con.* = to sleep

स्वान्त *n.* = mind

हन्त *ind* = alas

हय *m.* = a horse

हा *3rd con.* with वि = to abandon.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुस्तकालय
गुरुकुल कांगड़ी

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

BOOKS BY THE SAME AUTHOR

1. Vakyathathwam

(A SHORT GRAMMAR FOR BEGINNERS)

The Madras Mail writes:—Vakya Tatwam is an introduction to Sanskrit Grammar written by Pundit P. S. Ananthanarayana Sastry for the benefit of beginners in that subject and is well adapted to meet the requirements of Sanskrit students in High Schools.

Price 0—6—0

2. Charka Sara

(AN EASY TREATISE ON THARKA SHASTRA FOR BEGINNERS)

The Modern Review writes:—The books on the Hindu Logic in Sanskrit are generally very difficult owing to their technicality and phraseology. Pandit Ananthanarayana with the object of obviating this difficulty daily experienced by beginners has made the categories enumerated in the 'Vaiseshika Darshana' very easy by entirely avoiding or in some cases clearly explaining the obstacles alluded to. The book deserves to be widely circulated among the student class.

Price 0—6—0

For copies apply to:—

The Mangalodayam Co., Ltd., Trichur

(Cochin State.)

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार

पुस्तक लौटाने की तिथि अन्त में अङ्कित है। इस तिथि को पुस्तक न लौटाने पर छै नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड लगेगा।

१००००.९.५९।

25 MAR 2006

DIGITIZED C-DAC
2005-2006

CC0. Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तकालय, गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

25 [illegible] 20[illegible]

DIGITIZED BY [illegible]
2005-2006

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri